# नीतिशिक्षायाः साम्प्रतिकशिक्षाव्यवस्थायां प्रासङ्गिकता

**छबिलाल उपाध्यायः**
सहायकाचार्यः
कुमारभास्करवर्मसंस्कृतपुरातनाध्ययनविश्वविद्यालयः
Email: chabilalupadhyaya21@gmail.com

**शोधसारः**

आधुनिककाले शिक्षायाः मुख्यलक्ष्यं केवलं ज्ञानप्रदानं न, अपितु विद्यार्थिनां सम्यक् चरित्रनिर्माणं, सामाजिकदायित्वबोधस्य विकासः, नैतिकमूल्यानां संवर्धनञ्च अस्ति। नीतिशिक्षा मानवजीवनस्य मूलाधाररूपेण तिष्ठति, या मनुष्यं कर्तव्याकर्तव्यविवेकसम्पन्नं करोति। अस्यां लेखन्याम् नीतिशब्दस्य व्युत्पत्तिः, तस्य कोषगतार्थाः, पाश्चात्यदृष्ट्या 'ethics' इत्यस्य तुलनात्मकविवेचनं च प्रस्तुतम्। अद्यतनसमाजे नैतिकमूल्यानां ह्रासः, स्वार्थपरता, अनुशासनहीनता च दृश्यन्ते, येन समाजस्य संतुलनं बाध्यते। तस्मात् शिक्षाक्षेत्रे नीतिशिक्षायाः समुचितसमावेशः अत्यावश्यकः इति प्रतिपादितम्। नीतिशिक्षा न केवलं व्यक्तित्वविकासाय, अपितु राष्ट्रनिर्माणाय अपि अनिवार्या अस्ति। एषा विद्यार्थिनः सदाचारिणः, उत्तरदायिनः च निर्माति। अतः निष्कर्षरूपेण उक्तं यत् यदि शिक्षायां नीतिमूल्यानि सम्यक् प्रकारेण समाविष्टानि भवन्ति, तर्हि एव स्वस्थः, सुसंस्कृतः, सन्तुलितः च समाजः निर्मातुं शक्यते।अतः अस्मिन् शोधपत्रे साम्प्रतिकशिक्षाव्यवस्थायां नीतिशिक्षायाः प्रासङ्गिकता विविच्यते।

**कूटशब्दाः-** नीतिशिक्षा, शिक्षाव्यवस्था, नैतिकमूल्याः, आचरणम्, चरित्रनिर्माणम्, सामाजिकदायित्वम्, नैतिकता, नीतिशास्त्रम्, आधुनिकशिक्षा, व्यक्तित्वविकासः।

**प्रस्तावना**

भारतीयपण्डितानां मतानुसारं नी धातोः क्तिन् प्रत्ययेन 'नीति' शब्दो निष्पद्यते। समग्रसमाजं राष्ट्रञ्च नैतिकतया स्वस्थसन्तुलितपथि अग्रेसर्तुं येषां विधिनिषधेमूलक-सामाजिक-व्यवहारिकाचारिक-आध्यात्मिक-राजनैतिकाचारपरकनियमानां विधानं क्रियते सा नीति नाम्नाभिहिता अस्ति। दैवदुर्लभमनुष्यजीवनस्य वास्तविकं चरमलक्ष्यं प्राप्तुं साधनरूपेण येषां मूलतत्वानाम् अनिवार्यत आवश्यकता भवति, यथार्थतः सैषा नीति इत्युदीरितो भवति। मनुजानां श्रेष्ठत्वं तेषां सात्विकबुद्धिवृत्योपरि एवालम्ब्यते । यत्र मनुष्यस्याचरणं कथं स्यात् ? किमुचितम् ? किञ्च अनुचितम् इत्यस्य मीमांसां कृत्वा जीवनम् औचित्यं प्रति नयति अत उत्प्रेरयति सैषा

नीतिरीति कथ्यते। अत एव शुक्रनीतौ प्राप्यते नयनात् नीतिरुच्यते इति।[१] एवं मानवजीवनोपयोगी शाश्वतोपायानां निर्देशो यत्र वर्तते सा नीतिरित्युदीरितं पदवाच्यम्।[२] अतएव शुक्रचार्येण प्रोक्तं-

सर्वलोकव्यवहारस्थितिर्नीत्या विना नहि।
यथाऽशनैर्विना देहस्थितिर्न स्याद्विदेहिनाम्॥[३]

**नीतिशब्दस्य कोशगतार्थः**

नीतिशब्दस्य कोषगतोऽर्थो भवति- निर्देशनं, दिग्दर्शनं, आचरणं, व्यवहारः, औचित्यं, नीतिकौशलं, व्यवहारकुशलता, योजना, उपायः, कूटयुक्तिः[४], राजनयः[५], राजनीतिविज्ञानं, राजनीतिज्ञता, आचारशास्त्रं, नीतिशास्त्रं, आचारदर्शनञ्चेति[६]। नयति इति नीतिः। पाश्चात्यमते तु 'ethics' इति ग्रीक् शब्दः 'ethica' तः व्युत्पन्नः यस्यार्थो भवति रीतिः, प्रचलितनियमो व्यवहारो वा। अयमेव नीतिविज्ञानम् (Science of Morality) इत्यपि उच्यते। 'Morality' इति शब्दस्योत्पत्तिः 'Mores' इतिशब्दात् जायते। 'Mores' इत्यस्यार्थः प्रचलनं रीतिः वा। अतः नीतिशास्त्रस्य (ethics) सम्बन्धः प्रयोजनं, रीतिनीतिः, व्यवहारादेवास्ति। रीति-नीतिः, प्रचलनं, व्यवहारादि मनुस्यकर्माणि मनुष्यस्य ऐच्छिककर्माणि, तदेव आचरणम् (conduct) इति कथ्यते। एताः क्रियाः विश्वस्य जीवितेषु निर्जीवेषु सर्वेषु परार्थेषु दृश्यन्ते चेत् तदाचरणं न। संकल्पिता स्वेच्छया कृता क्रिया आचरणमिति उच्यते।[७] नीतिशास्त्रम् उचिताचरणम् (right conduct) अथवा आचरणस्य आदर्शस्य (ideal in conduct) विज्ञानमित्युच्यते।[८] मानवस्यमाचरणं तेषां चरित्रे (character) प्रतिष्ठितम्। चरित्रस्य आचरणस्य च सम्बन्धो वृक्षस्य मूलं तथा च फलमित्यस्य समं भवति। यथा मूलं तथा फलम्। नीतिशास्त्रमुचिताचरणस्य विज्ञानमुच्यते।

एवं प्रकारेण वक्तुं शक्यते यत् नीतिशास्त्रं तद् विज्ञानं यत्र मानवाचरणस्य आदर्शस्य मीमांसा भवति, यत्र मनुष्यस्य कर्तव्याकर्तव्यं कर्मणामौचित्यानौचित्यस्य च यथायथः निर्णयकर्तुं शक्यते। यतो हि आचरणस्य आधारं चरित्रम्। अतएव नीतिशास्त्रं चरित्रविज्ञानमपि वक्तुं शक्यते।

**का नाम नीतिशिक्षा**

तत्र 'शिक्षा' शब्दः शिक्ष धातुतः निष्पद्यते। यस्यार्थः ज्ञानाहरणं, ज्ञानप्रदानं वा भवति। इत्थं नीतिपरकीया शिक्षा नीतिशिक्षा।

**नीतिशिक्षायाः साम्प्रतिकशिक्षाव्यवस्थायां प्रासङ्गिकता**

तत्र सहितस्य भावः साहित्यम्। वेदोक्तसाहित्यं वैदिकसाहित्यम्। भुमण्डलेऽस्मिन् समुपलब्धेषु विविधभाषागतप्राचीनग्रन्थेषु वेदः सर्वेभ्यः प्राचीनतमः इति सर्वैरपि अङ्गीक्रियते। 'विद्यन्ते धर्मादयः पुरुषार्था यैस्ते वेदाः' इति वेदशब्दस्यार्थः। 'इष्टप्राप्त्यनिष्टपरिहारयोः

अलौकिकमुपायं यो वेदयति स वेद' इति सायणाचार्यकृतं वेदलक्षणम्। वेदपदेन तु संहिता, ब्राह्मणम्, आरण्यकम्, उपनिषद, इति चतुर्णां ग्रन्थानां बोधो भवति । संहिता छन्दोबद्धमन्त्रयुक्ता, ब्राह्मणभागो गद्यात्मको यागादिवर्णनपरकः, आरण्यकभागो छन्दोबद्धमन्त्रयुक्तो गाथारूपो वा विद्यते, उपनिषद्भागे तत्तत्संहितागत-ब्रह्मज्ञानादिविषयाणां वर्णनरूपेण संकलनम्। एते चत्वारो विभागाः ऋक्-साम-यजु-अथर्वेति चतुर्षु वेदेषु समुपलभ्यन्ते। वैदिकसाहित्यमिदं भारतीयसंस्कृत्याः मुलाधारोऽस्ति । यत्र नाना नीतिशिक्षया मनुष्यं नीतिवन्तं चरित्रवन्तं च भवितुमुपदिष्टमस्ति ।

मनुष्यस्याचरणं तस्य चरित्रं व्यक्तीकरोति । यथा चरित्रं तथा मनुष्यास्याचरणं भवति । उचिताचरणं तस्यैव भवति यस्य चरित्रं शुद्धमस्ति । अतएव श्रुतिः उद्घोषयति 'मनुर्भव'[९] इति । तस्मात् मनुजैः यत्नेन वृत्तस्य (चरित्रस्य) रक्षा कर्तव्या, वित्तस्य (अर्थस्य) तु आवागमनं भवति एव। उक्तं च महाभारते-

वृत्तं यत्नेन संरक्षेद वित्तमेति याति च ।<br>अक्षीणो वित्ततः क्षीणो वृत्तस्तु हतो हतः ।।[१०]

मानवजीवनस्य चरितार्थाय वेदोक्तसप्तमर्यादानां परिपालनं श्रेयस्करं भवति। मर्यादेति शब्दः 'मर्य+अदा' इति शब्दद्वयस्य योजनेन निष्पद्यते यस्यार्थो भवति मनुष्यान्नत्ति, मनुष्यान् खादति इति । ताः यथा-

सप्तमर्यादाः कवयस्ततक्षुस्तासामेकामिदभ्यहुरोगात् ।<br>आयोर्हस्कम्भ उपमस्य नीले यथा विसर्गे धरुणेषु तस्थौ ।।[११]

तत्र निरुक्ते मन्त्रस्यास्य व्याख्याय आचार्ययास्कः नैतिकपवित्रजीवनार्थं सप्तमर्यादाः परिगणयन्ति - मद्यपानम् अक्षक्रीड़ा, स्त्रीसेवनम्, आखेटः, दण्डदानं, कठोरवचनप्रयोगः, वाक् पारुष्यं वा, छिद्रान्वेषणञ्चेति । एताननितिरिच्यपि यद्वेति उक्त्वा व्यभिचारः, ब्रह्महत्या, सुरापानं, पुनःपुनश्च पापाचरणं असत्यस्यावलम्वनञ्चेति अन्येषां षड् अनैतिककर्मणामाख्यानं कृतम् तेन। प्राप्यते च तत्र पानमक्षाः स्त्रीयो मृगया दण्डः पारुष्यमन्यदूषणम् इति सप्तमार्यादाः । यद्वास्तेयं, गुरुतल्पारोहणं, ब्रह्महत्यां, भ्रूणहत्यां सुरापानं दुष्कृतस्य कर्मणः पुनः पुनः सेवां पातकेऽनृतोद्यमिति ।[१२]

तत्र प्रायशः सर्वेऽपि भारतीयशास्त्रकाराः ब्रह्महत्या-सुरापानम् इत्यादि वाचयित्वा निषिद्धकर्माणि निन्दन्ति । प्रकारान्तरेऽस्मिन् महाभारतेऽपि एताः सप्तमर्यादाः सप्तदोषरुपेण उल्लिखिताः[१३] समृद्धसमाजनिमाणार्थं स्वयं भगवान् वेदपुरुषः मोहादिषड्दोषान् परित्यक्तुं मानवसमाजमुपदिशति। मोह-क्रोध-मत्सर-काम-मद-लोभ-इत्येतान् दोषान राक्षसोवृत्तिमिति विचार्य

एतेषां परित्यागाय निर्दिशति।[१४] एकात्मदर्शनचिन्तनेन अनुप्राणितविषमतारहितसमतामूलकस्य राष्ट्रस्य संरचनार्थं प्रतिनागरिकं परस्परं मित्रभावनया भावयन्तमेकमत्येन सम्भूय सङ्घसमित्यादिनां सञ्चालने शिक्षां प्रददाति।[१५] यत्र अनीतिपूर्वकमुपार्जितं धनं पापस्वरुपं मतम् । एवं विधाम् अनीतिपूर्वकमर्जितां लक्ष्मीं 'पतयालुः, अजुष्टा' इति उक्त्वा एतां लक्ष्मीं दुर्गतिप्रदायिका मन्यते स्म। वर्तमान आर्थिकभ्रष्टाचारात् मुक्त्यर्थं पुण्यमयीं पुतां लक्ष्मीं संग्रहणाय लोकोपकारकं सन्देशं वितरति वेदः।[१६]

समाजसंरचने शिष्टकुटुम्बः बान्धवाञ्च प्रधानघट्टरुपेण परिगणिताः भवन्ति । परस्परस्नेहसिक्तमाधुर्यभावस्य व्यवहारेण परिवारे स्थायी सुखसमृद्धि आयाति । परिवारप्रबन्धनसम्बन्धे वेदसाहित्यं शिक्षयति यत् पुत्रः पितृणां मातृणां च आदेशनां पालको भवेत् । पत्नी अपि पत्या सह मृदु-मधुरवचसा व्यवहरेत् । भातृणां मध्ये भगिनीनां मध्ये विद्वेषभावो न विद्येत् भद्रम् उद्येत्।[१७] भारतीयदाम्पत्यजीवनशैली नीतिशिक्षापुष्टा अनुकरणीया वर्तते । भारतीयसतीनारी कुलपरम्परानुसारं मातृपितृभ्यां यस्मै वराय दाम्पत्यसूत्रबन्धनं क्रियते, तद् आजीवनपतिव्रतधर्मपालनपुर्वकं जीवति कदापि न त्यजति । वैदिकनार्यः चिन्तयन्ति यत् सा होवाच यस्मै मां पिताऽदान्नैवाहं तं जीवन्तं दास्यामीति । साम्प्रतिककाले अनुदिनं वर्धमानस्य दाम्पत्यसम्बन्धविच्छेदस्य भयावहता नियन्त्रणं कर्तुं शक्यते वैदिकशिक्षया ।

मातृगर्भाशये वर्धमानस्य शिशोः आधुनिकस्वार्थीलोभीसमाजः तस्य भूमिष्ठात् पूर्वमेव गर्भपातेन भ्रूणहत्यां करोति, विशेषतया कन्याभ्रूणहत्यां करोति कारयति च । वैदिकप्रमाणवचनानुसारं भ्रूणहत्यारुपापराधो जघन्यपापमित्युक्त्वा गर्भस्थ शिशोः सर्वथा संरक्षणं विधेयमिति शिक्षा लभ्यते।[१८]

वैदिकपरम्परायां स्त्रीपुरुषयोः आदर्शपरिधानस्य नैतिकसन्देशः प्रदत्तोऽस्ति । तथाकथिताधुनिकतायाः अस्मिन् उच्छृङ्खलपूर्णे वातावरणे यत्र काञ्चित् स्त्रियः तासां सम्मानसूचकगरिमां विस्मृत्य वित्तीयलोलुपतायां पतित्वा न्यूनातिन्यूनं वस्त्रं परिधृत्य निन्दनीय-अशिष्ट-अङ्गप्रदर्शनं कृत्वा प्रभूतधनोपार्जनं तु कुर्वन्ति । किन्तु सभ्यसमाजे तद् अश्लीलप्रदर्शनमागामियुवानां कृते संस्कारहीनतावर्धकाभिशापरुपेण सिद्धं भवति । तदर्थं वैदिकऋषिनिर्दिष्टमार्गो हि 'स्त्रीपरिधानं' स्वभावचरित्रपरिवर्तनं कर्तुं शक्नोति । यत्र उक्तमस्ति-अधः पश्य, ऊर्ध्व न, पादौ संकुचितौ स्थाप्येताम्, तथा वस्त्रधारणं कुरु यथा तव कट्याः निम्नभागं कश्चिदपि न पश्येत् इति ।[१९]

वेदेषु विश्वबन्धुत्वभावनापि अतिशय दृष्टिगता भवति । अतिक्षुद्रसङ्कीर्णभावना प्रतिस्पर्धात्मकराष्ट्रवादस्य धारणादुपरि गत्वा सम्पूर्णपृथिवीमेकं विशालराष्ट्ररुपेण निरूपयन् समस्तेषु प्राणिषु तादृशविश्ववन्धुत्वभावना स्थापनाय उपदिशति यत् अन्यत्र दूर्लभम् । वयं सर्वे मित्राणीति कथयता यजुर्वेदे उच्यते-

मित्रस्य मा चक्षुषा सवीणि भूतानि समीक्षन्ताम् ।
मित्रस्याहं चक्षुषा सवीणि भूतानि समीक्षे।
मित्रस्य चक्षुषा समीक्षामहे ।।[२०]

अथर्ववेदेऽपि भूमिभागोऽयं मम माता पुत्रोऽहम् एतस्याः[२१] इति विश्वजनीनभावना वर्णितास्ति यत् अद्यत्वे स्वार्थप्रधानमानवसमाजे ज्योतिपूर्णाशाः सञ्चारयन्ति ।

"जननी जन्मभूमिश्च स्वर्गादपि गरीयसी" "माता भूमिः पुत्रोऽहं पृथिव्याः" इत्यादिराष्ट्रभक्तिभावनायाः पूष्टा वर्तते वैदिकी शिक्षा। स्वप्राणान्नपि तृणवत् गणयन् देशमातुः सेवा कर्त्तव्येति ऋग्वेदवचनम् ।[२२] इयं वैदिकी ऋचा राष्ट्रहिताय सर्वस्वसमर्पणस्य ऊर्जस्वलशिक्षा प्रददाति । पृथिवीमण्डले प्रवाहिताः समस्तनद-नद्यादिजलस्त्रोतेषु यथा सुमधुरपेयजलोपलब्धिः स्यात् तदर्थ तेषु स्थलेषु कदापि मल-मूत्रत्यागादिनि अपद्रव्याणि पातने क्षेपणे वा निषेधारोपं विधाय वेदे कथितं "नाप्सु मूत्रपुरीषं कुर्यात्" इति।[२३] सम्पूर्णे विश्वे सुव्यवस्था भवेत्, सर्वे प्राणिनः सुखिनः सन्तु, सर्वेषां कल्याणं भवतु इति वदेवचनम्।[२४] तत्र मनुष्य-प्राणि-द्युलोक-अन्तरिक्षलोक-वनस्पतयश्च स्वच्छ-प्रदूषणरहितं भवेदिति शिक्षणं प्रदीयते।[२५] इत्थं विश्वशान्तिः सर्वैः वैदिकऋषिभिः ऋग्वेदे 9/11/3 अथर्ववेदे 19/9/3-5, 19/9/14, 8/4/15, 3/30/01 शुक्लयजुर्वेदे 37/17 अन्यत्रापि बहुत्र विवेचिता |

**निष्कर्षः**

वस्तुतः यथा अंकुशं विना हस्ती, रज्जुं विना वाजिनः हानिकारकाः भवन्ति तथैव नियन्त्रणं नीतिं वा विना समाजव्यवस्थापि हानिकरी भवति । सन्तुलितसमाजसंस्थापनाय ऋतम्भराप्रज्ञासम्पन्नऋषिभिः विश्वकल्याणकारी राष्ट्रस्य संकल्पना कृतासन्। तैः प्रदत्तानि उपदेशवचनानि अनुसरामः चेत् साम्प्रतिकनैतिकमार्गं प्रति धावमानान् मानवान् नीतिपथि आनीय स्व-स्व कर्मकरणाय प्रेरयितुं शक्यते । इति शम् ।

**पादटीका :**

१. शु०नी० १/१५६

२. ऋग्० १/१०/१

३. शु० नी० १/११
४. शु० नी० १/५
५. शु० नी० १/५६, म० शा० प० ६३/२८-२९
६. संस्कृत-हिन्दीकोषः, वामनशिवराम आप्ते, पृ.५५०
७.नीतिशास्त्र की रुपरेखा , अशोककुमार वर्मा, पृष्ठा २
८.'Ethics is the normative science of the conduct of human beings in societies'- W. Lellie.
९.ऋग्० १०/५३/६
१०. म० उद्योग० प० ६३/३०
११. ऋग्० १०/५/६ अथर्व ५/१/६
१२ निरुक्तम् ६/२७, वदेविद्या (शोधपत्रिका, २०१२) पू. १३५
१३. म० उद्योग० प० ३३/९१-९२
१४. ऋग्० ७/१०४/२२, अथर्व० ८/४/२२, वेदविद्या (शोधपत्रिका, २०१२) पृ. १३७
१५. सं गच्छध्वं सं वदध्वं सं वो मनांसि जागताम् ।
देवा भागं यथा पूर्वे संजनानां उपासते ।।
समानो मन्त्रः समितिः समानी समानं मनः सह चित्तमेषाम् ।
समानं मन्त्रमभि मन्त्रये वः समानेन वो हविषा जुहोमि ।।
समानी व आकुतिः समाना हृदयानि वः ।
समानमस्तु वो मनो यथा वः सुसहासति ।। ऋग्० १०/१९९/२-४
१६. रमन्तां पुण्या लक्ष्मीर्याः पापीस्ताः अनीनशम् ।। अथर्व० ३/११५/४
१७. अनुब्रतः पितुः पुत्रो मात्रा भवतु संमनाः।
जाया पत्त्ये मधुमतीं वाच वदतु शन्तिवाम् ।
मा भ्राता भ्रातरं द्विक्षन् मा स्वसारमुत स्वसा ।
सम्यञ्चः सब्रता भूत्वा वाच वदत भद्रया।। अथर्व० ३/३०/२-३
१८. कृष्णयजुर्वेदीया काठकसंहिता ३१/७
१९. अधः पश्यस्व मोपरि संतरां पादकौ हर।
मा ते कशप्लकौ दृशन् त्स्त्री हि ब्रह्मा बभूविथ । ऋग्० ८/३३/१९
२०. शु० यजु० ३६/१८
२१. अथर्व० १२/१/१२
२२ ऋ० १०/१८/१०
२३. तैत्तिरीयाण्यकम् ० १/२६/७
२४.ऋग्० ९/६३/४, अथर्व० १/३१/४
इन्द्र वर्धन्तो अप्तुरः कृष्णन्तो विश्वमार्यम् (ऋग्० ९/६३/४)
२५. शु० यजू० ११/४५.